**संस्कृत वार्ता:**

**दिनाङ्क : 30/08/2026**

**सायम 06:20**

**<u>आदौ मुख्यवार्ता:</u>**

· भारत-उज्बेकिस्तानयोः मध्ये खनन-आयुर्वेद-पर्यटन- रणनीतिक-सहभागितां समेत्य बहुषु क्षेत्रेषु सन्धि-पत्राणि हस्ताक्षरङ्गतानि ।

· मन की बात इत्याख्ये कार्यक्रमे प्रधानमन्त्रिणा मोदिना पीएम-स्वनिधि-योजनया महिला-सशक्तीकरणं प्रतिपादितम्, उक्तञ्च पञ्चत्रिंशल्लक्षाधिकाः महिलाः अनया लाभान्विताः ।

· प्रधानमन्त्रिणा मिशन शक्ति-सैट् इत्याख्यः उपक्रमः प्रतिपादितः ,अष्टोत्तरशतदेशानां द्वादशसहस्रं छात्राः उपग्रह-प्रौद्योगिकीं ज्ञास्यन्ति, नूतनोन्मेषं च साधयिष्यन्ति ।

· मादकमुक्त-भारताभियानाय घोषवाक्यानि, विषय-सामग्रीं च निर्मातुं प्रधानमन्त्रिणा मोदिना युवानः अभ्यर्थिताः ,अभियानं देशे द्रुतगत्या प्रवर्धते इत्यपि अमुना प्रोदीरितम् ।

· नेपाल-देशे भीष्म-जलाप्लावेन मृतानां संख्या अष्टषष्ट्यधिक-सप्तशतं सम्प्राप्ता, प्रायः पञ्चविंशतिशतं जनाः अद्यापि विलुप्ताः, भारतेन एकादश-टन-मितां मानवीय-सहायता-सामग्रीम् आदाय चतुर्थं विमानं नेपालाय प्रेषितम् ।

· **अपि च,**

· युएई-देशस्य दुबई-अन्ताराष्ट्रिय-क्रीडाङ्गणे विंशति-प्रतिविंशति एशिया-चषक-स्पर्धायाम् अद्य सायं भारत-थाईलैण्ड्-दले परस्परं सम्मुखीभविष्यतः ।

**<u>अथ वार्ता: विस्तरेण</u>**

**<u>प्रधानमंत्री उज्बेकिस्तान यात्रा</u>**

भारत-उज्बेकिस्तान-देशाभ्याम् अद्य खनन- आयुर्वेद- पर्यटनार्थिकसहयोग-पर्यावरण-उच्चशिक्षादिक्षेत्रेषु परस्पर-सहयोग-संवर्धनाय सन्धिपत्राणि हस्ताक्षरितानि। देशद्वयेन त्रिंशदुत्तरद्विसहस्त्रवर्षे यावत् पञ्चार्बुद-डालरमितं व्यापारलक्ष्यं निर्धारितम्। यत् हि साम्प्रतिक - व्यापारास्य पञ्चगुणितं वर्तते। प्रधानमंत्री नरेन्द्र मोदी उज्बेकिस्तानस्य सर्वोच्च-सम्मानम् अपि अलभत। इदं सम्मानं देशद्वयस्य मध्ये सहयोग- संवर्धने तदीय-योगदानाय उपायनीकृतम्।

ताशकंद-नगरे उज्बेकिस्तानस्य राष्ट्रपति: शावकत मिर्जियोयेव: प्रधानमन्त्रिणे नरेन्द्र-मोदिने सर्वोच्च राजकीय-सम्मानेन ऑर्डर ऑफ ओलिय दरजाली दोस्तलिक इत्यनेन सम्मानितवान्। प्रधानमंत्रिणा एष: सम्मान: भारत-उज्बेकिस्तानयो: दृढ सम्बन्धेभ्य: समर्पित:।

**बाइट- पीएम मोदी टोलरेन्स उज्बेकिस्तान**

श्रीमोदी अवोचत् यत् सम्मानं प्राप्य असौ गौरवमनुभवति। अपि च देशद्वयं व्यापक-रणनीतिक-संरचनाया: अंतर्गतं निर्णायक-लक्ष्य-निर्धारणार्थम् अग्रे समेधयिष्यन्ते। राष्ट्रपतिना शावकत मिर्ज़ियोयेफ इत्यनेन सह प्रतिनिधिमंडल-स्तर-

वार्तायां श्रीमोदी अवोचत् यत् देशद्वयं निजसम्बन्धान् व्यापक-रणनीतिकसहभागितास्तरं यावत् नयत:। अनन्तरं सहयोगस्य समस्तस्तराणां समीक्षायै विदेशमंत्रिणां समन्वयसमितेः घटना विधास्यते।

**प्रधानमन्त्री- मन की बात**

प्रधानमन्त्री नरेन्द्र-मोदी प्रावोचत् यत् विकसित-भारताय मादकमुक्त-युवाभियानं कृत्स्ने हि देशे द्रुतगत्या अग्रे संवर्धते। अद्य प्रातः आकाशवाणीतः प्रसारिते'मन की बात इत्याख्ये कार्यक्रमे स्व-विचारान् उपस्थापयन् श्रीमोदी सन्तोषं प्राकटयत् यत् व्यसन-मुक्त-युवकानां मादकमुक्त-भारतस्य च लक्ष्य-युक्तम् इदम् अभियानं केवलम् औपचारिकं नास्ति, अपि तु बहवः जनाः विशेषतः युवानः महत्या संख्यया अस्मिन् संयुज्यन्ते।

**बाइट - पीएम आन ड्रग फ्री यूथ 27 से.**

प्रधानमन्त्री न्यवेदयत् यत् मादक-द्रव्य-व्यसनं केवलम् एकं जनं न ग्रसते, अपि तु समग्रः परिवारः समाजश्च अस्य दुष्परिणामान् भुङ्क्ते। सः तेषां सर्वेषां भूरिशः प्रशंसां कृतवान् ये मादक-विरोधि-जागरूकतां प्रसारयन्ति अथ च मादकद्रव्येन पीडितानां साहायतायै अग्रे आगच्छन्ति।

प्रधानमन्त्री अवदत् यत् पीएम-स्वनिधि-योजना-माध्यमेन लक्षशः महिलाः नूतनं सामर्थ्यं प्राप्नुवन्ति। सः अकथयत् यत् महिला-सशक्तीकरणस्य अस्मिन् उपक्रमे यावती चर्चा भवेत् तावती न दृश्यते। श्रीमोदिना स्पष्टीकृतं यत् पीएम-स्वनिधि-योजनायाः लाभार्थिषु प्रायः षट्चत्वारिंशत्-प्रतिशतन्मिताः महिलाः सन्ति।

**विराम**

**संस्कृतवार्तायाः संस्करणमिदम इदानीम आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः <u>आकाशवाण्याः</u> अन्तर्जालपटले <u>www.newsonair.gov.in</u> इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

प्रधानमन्त्री प्रोक्तवान् यत् स्वच्छतायां बहवो गुणाः भवन्ति। सः अवदत् यत् यदा कस्यचित् स्थानस्य स्वच्छता-सङ्कल्पः जनसामान्यस्य स्वकीय-सङ्कल्पः भवति, तदा सः तस्य स्थानस्य समग्र-स्वरूपम् एव परिवर्तयति।

श्रीमोदी अवदत् यत् अद्य देशस्य कन्यानां स्वप्नाः भूमेः आरभ्य अन्तरिक्षं यावत् विस्तीर्णाः। सः असूचयत् यत् भारतं समग्र-विश्वस्मात् सहस्रशः कन्याः एकत्र आनयति याः एतादृशान् स्वप्नान् पश्यन्ति । प्रधानमन्त्रिणा प्रतिपादितं यत् अस्य उपक्रमस्य नाम मिशन शक्ति-सैट्' इत्यस्ति, येन अष्टोत्तरशत-देशानां द्वादश-सहस्रं छात्राः नूतनोन्मेष-क्षेत्रे उपग्रह-प्रौद्योगिकीं ज्ञातुम् अवसरं प्राप्नुवन्ति।

प्रधानमन्त्री मुम्बई-नगरस्थेन कृष्ण-शेषाद्रि इत्यमुना सह सम्भाषणम् अकरोत्, येन <u>www.bharatrajya.com</u> इति एकं विशिष्टं वेबफलकं निर्मितम्। अनेन वेबफलकेन कस्यापि वर्षस्य चयनेन जनाः सहजतया ज्ञातुं शक्नुवन्ति यत् तस्मिन् काले भारतस्य कस्मिन् भागे कस्य शासकस्य शासनम् आसीत्।

श्रीमोदी अवदत् यत् अस्मिन् वर्षे वन्दे मातरम् इति गीतस्य सार्ध-शततमी जयन्ती वर्तते , अतः इदं वर्षम् इतोऽप्यधिकं विशिष्टं महत्त्वमावहति।

**<u>नेपालजलप्लावः</u>**

मध्यनेपाले आकस्मिकजलप्रलयेन मृतानां संख्या समेध्य अष्टषष्ट्युत्तर-सप्तशतं संवृत्ता। अद्यापि मृतवपुंसि सम्प्राप्यन्ते। अस्यां घटनायां सार्धद्विसहस्रजनाः

विलुप्ताः सन्ति। संकटस्य पञ्चमे दिने साहाय्योद्धारकर्मचारिणः द्रुतगत्या विलुप्तानाम् अन्वेषणाय कार्यं कुर्वन्ति, अष्टसु अपि प्रभावितजनपदेषु शवः प्राप्ताः। नेपालस्य नेशनल डिज़ास्टर रिस्क रिडक्शन एंड मैनेजमेंट अथॉरिटी (NDRRMA) इत्यनेन उक्तं यत् इदानीं यावत् षडाशीत्युत्तरैकशताधिकाष्टसहस्रजनाः सुरक्षापूर्वकं निष्कासिताः। एतेषु सप्तविंशत्यधिकद्विशतं वैदेशिकनागरिकाः वर्तन्ते। विदेशमंत्रालयेन उक्तं यत् पादोनत्रिशतं भारतीयनागरिकाः विलुप्ताः सूच्यन्ते। भारतं साहाय्योद्धारकार्येषु अनवरतं साहाय्यं विदधाति। एकादश टन भारमिता साहाय्य-सामग्रीं नीत्वा चतुर्थं विमानं काठमांडू नगरं प्राप्तम्।

**<u>महिला क्रिकेट</u>**

महिलानाम् एशियाचषक-विंशतिं प्रति विंशतिः क्रिकेट-चषक-शृङ्खलायाम् अद्य भारतीय-महिला-दलं थाईलैंड-दलेन सह क्रीडिष्यति। इयं स्पर्धा दुबई-नगरे भविष्यति। भारतीय-समयानुसारेण रात्रौ सार्ध अष्टवादने स्पर्धा आरप्स्यते। दलनायिकायाः हरमनप्रीत कौर इत्यस्याः नेतृत्वे भारतं प्रतियोगितायां स्वस्य अभियानस्य आरम्भं करिष्यति।

**।। इति वार्ताः ।।**